योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ३२

द्वात्रिंशः सर्गः ३२

श्रीवसिष्ठ उवाच ।।

प्रह्लाद इति संचिन्त्य कृत्वा नारायणीं तनुम् ।

पुनः संचिन्तयामास पूजार्थमसुरद्विषः ।। १

वपुषो वैष्णवादस्मान्मा भून्मूर्तिः परावरा ।

अयं प्राणप्रवाहेण बहिर्विष्णुः स्थितोऽपरः ।। २

वैनतेयसमारूढः स्फुरच्छक्तिचतुष्टयः ।

शङ्खचक्रगदापाणिः श्यामलाङ्गश्चतुर्भुजः ।। ३

चन्द्रार्कनयनः श्रीमान्कान्तनन्दकनन्दनः ।

पद्मपाणिर्विशालाक्षः शार्ङ्गधन्वा महाद्युतिः ।। ४

तदेनं पूजयाम्याशु परिवारसमन्वितम् ।

सपर्यया मनोमय्या सर्वसंभाररम्यया ।। ५

तत एनं महादेवं पूजयिष्याम्यहं पुनः ।

पूजया बाह्यसंभोगमहत्या बहुरत्नया ।। ६

प्रह्लाद इति संचिन्त्य संभारभरभारिणा ।

मनसा पूजयामास माधवं कमलाधवम् ।। ७

रत्नौघपात्रपटलैश्चन्दनादिविलेपनैः ।

धूपैर्दीपैर्विचित्रैश्च नानाविभवभूषणैः ।। ८

मन्दारमालावलनैर्हेमाब्जपटलोत्करैः ।

कल्पवृक्षलतागुच्छै रत्नस्तबकमण्डलैः ।। ९

पल्लवैर्दिव्यवृक्षाणां नानाकुसुमदामभिः ।

किंकिरातैर्बकैः कुन्दैश्चम्पकैरसितोत्पलैः ।। १०

कह्लारैः कुमुदैः काशैः खर्जूरैश्चूतकिंशुकैः ।

अशोकैर्मदनैर्बिल्वैः कर्णिकारैः किरातकैः ।। ११

कदम्बैर्बकुलैर्निम्बैः सिन्दुवारैः सयूथकैः ।

पारिभद्रैर्गुग्गुलीभिर्बिन्दुकैः पुष्पकोत्करैः ।। १२

प्रियङ्गुपटलैः पाटैः पाटलैर्धातुपाटलैः ।

आम्रैराम्रातकैर्गव्यैर्हरीतकबिभीतकैः ।। १३

शालतालतमालानां लताकुसुमपल्लवैः ।

कोमलैः कलिकाजालैः सहकारैः सकुङ्कुमैः ।। १४

केतकैः शतपत्रैश्च तथैलामञ्जरीगणैः ।

सर्वसौन्दर्यसंमानैः स्वयमात्मार्पणैरपि ।। १५

हरिं परमया भक्त्या जगद्विभवभव्यया ।

मनसा पूजयामास प्रह्लादोऽन्तःपुरे पतिम् ।। १६

अथ देवगृहे तस्मिन्बाह्यार्थैः परिपूर्णया ।

पूजया पूजयामास दानवेशो जनार्दनम् ।। १७

बहिर्द्रव्यैरनेनैव क्रमेण परमेश्वरम् ।

पुनःपुनः पूजयित्वा तुष्टिमान्दानवोऽभवत् ।। १८

ततस्ततः प्रभृत्येव प्रह्लादः परमेश्वरम् ।

तथैव प्रत्यहं भक्त्या पूजयामास पूर्णया ।। १९

अथ तस्मिन्पुरे दैत्यास्ततः प्रभृति वैष्णवाः ।

सर्व एवाभवन्भव्या राजा ह्याचारकारणम् ।। २०

जगाम वार्ता गगनं देवलोकमथारिहन् ।

विष्णोर्द्वेषं परित्यज्य भक्ता दैत्याः स्थिता इति ।। २१

देवा विस्मयमाजग्मुः शक्राद्याः समरुद्गणाः ।

गृहीता वैष्णवी भक्तिर्दैत्यैः किमिति राघव ।। २२

क्षीरोदे भोगिभोगस्थं विबुधा विस्मयाकुलाः ।

जग्मुरम्वरमुत्सृज्य हरिमाहवशालिनम् ।। २३

तत्रैनं दैत्यवृत्तान्तं कथयामासुरस्य ते ।

पप्रच्छुश्चैनमासीनमपूर्वाश्चर्यविस्मयम् ।। २४

विबुधा ऊचुः ।

किमेतद्भगवन्दैत्या विरुद्धा ये सदैव ते ।

ते हि तन्मयतां याता मायेयमिति भाव्यते ।। २५

क्व किलात्यन्तदुर्वृत्ता दानवा दलिताद्रयः ।

क्व पाश्चात्यमहाजन्मलभ्या भक्तिर्जनार्दने ।। २६

प्राकृतो गुणवाञ्जात इत्येषा भगवन्कथा ।

अकालपुष्पमालेव सुखायोद्वेजनाय च ।। २७

नोपपन्नं हि यद्यत्र तत्र तन्न विराजते ।

मध्ये काचकलापस्य महामूल्यो मणिर्यथा ।। २८

यो यो यादृग्गुणो जन्तुः स तामेवैति संस्थितिम् ।

सदृशेष्वप्यजेषु श्वा न मध्ये रमते क्वचित् ।। २९

न तथा दुःखयन्त्यङ्गे मज्जन्त्यो वज्रसूचयः ।

वैसादृश्येन संबद्धा यथैता वस्तुदृष्टयः ।। ३०

यद्यत्र क्रमसंप्राप्तमुपपन्नमनिन्दितम् ।

तदेव राजते तत्र जलेऽम्भोजं नतु स्थले ।। ३१

क्वाधमः प्राकृतारम्भो हीनकर्मरतिः सदा ।

वराको दानवो हीनजातिर्भक्तिः क्व वैष्णवी ।। ३२

कमलिनी परुषोषरभूगता सुखयतीह यथा न दुराश्रया ।

दितिसुतोऽपि हि माधवभक्तिमानिति कथा न तथेश सुखाय नः ।। ३३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे विबुधवाक्यं नाम द्वात्रिंशः सर्गः ।। ३२ ।।